भूर्जकण्टक:, पुं, वर्णसङ्करजातिविशेष:। इति जटाधर:॥ ( यथा, मनौ। १०। २१।
"व्रात्यात्तु जायते विप्रात् पापात्मा भूर्ज-
कण्टक:॥")

भूर्ज्जपत्र:, पुं, (भुवि ऊर्ज्जस्वलेभ्य: उपदेवजातिभ्य: पत्राण्यस्य।) भूर्ज्जवृक्ष:। इति रत्नमाला॥ ( यथा, रामायणे। २। ६४। २४।
"कुष्ठस्थगरपुन्नागभूर्जपत्रोत्तरच्छदान्॥" )
तथा चास्य पर्य्याय:।
"भूर्ज्जपत्र: स्मृतो भूर्ज्जश्चर्म्मी बहुलवल्कल:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

भूर्णि:, स्त्री, (बिभर्त्ति सर्व्वमिति। भृ+"घृणिपृश्निपार्ष्णिचूर्णिभूर्णि:।"उणा० ४। ५२। इति नि: निपातनादूत्वञ्च।) पृथिवी। मरुभूमि:। इत्युणादिकोष:॥ (भर्त्ता। यथा, ऋग्वेदे।७।८७।२।
"आत्मा ते वातो रज आनवीनोत्-
पशुर्न भूर्णिर्यवसे ससवान्।"
"भूर्णिर्जगतो भर्त्ता।" इति तद्भाष्ये सायन:॥)

भूर्लोक:, पुं, (भू:संज्ञको लोक:। शाकपार्थिवादिवत् समास:।) अन्तरीक्षादधो लोक:। मर्त्त्यलोक:। तस्य लक्षणं यथा,—
"पादगम्यञ्च यत्किञ्चित् वस्त्वस्ति पृथिवीमयम्।
स भूर्लोक: समाख्यातो विस्तारोऽस्य मयो-
दित:॥"
इति विष्णुपुराणे। २ अंशे ५ अध्याय:॥
चरणसञ्चारयोग्यं गिरिशिखरादि यावत् तावदुत्सेधो भूर्लोक इत्यर्थ:। विस्तारो मयोदित: सर्व्वतो लोकालोकावधि: पञ्चविंशतिकोटिप्रमाण:। इति तट्टीकायां स्वामी॥ अस्य विवरणं तत्रैव द्वितीयादिचतुर्थाध्यायेषु भूगोलशब्दे च द्रष्टव्यम्॥ ( यथा, भागवते। २। ५। ३८।
भूर्लोक: कल्पित: पद्भ्यां भुवर्लोकोऽस्य
नाभित:॥")

भूलग्ना, स्त्री, ( भुवि लग्ना।) शङ्खपुष्पी। इति राजनिर्घण्ट:॥

भूलता, स्त्री, ( भुवि लता इव।) किञ्चुलुक:। इति हेमचन्द्र:। ४। २६८॥

भूवदरी, स्त्री, ( भूलग्ना वदरी शाकपार्थिवादिवत् समास:।) क्षुद्रकोली। भड़वेर इति हिन्दीभाषा। तत्पर्य्याय:। क्षितिवदरी २ वल्लीवदरी ३ वदरवल्ली ४ बहुफलिका ५ लघुवदरी ६ वदरफली ७ सूक्ष्मवदरी ८। अस्या गुणा:। मधुराम्लत्वम्। कफवातविकारहारित्वम्। पथ्यत्वम्। दीपनत्वम्। पाचनत्वम्। किञ्चित् पित्तास्रकारित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्ट:॥

भूशय:, पुं, ( भुवि शेते इति। भू+शीङ्+"अधिकरणे शेते:।"३। २। १५। इति अच्।) नकुलगोधादि:। एतेषां मांसगुणा:। गुरुत्वम्। उष्णत्वम्। मधुरत्वम्। स्निग्धत्वम्। वायुनाशित्वम्। शुक्रकारित्वञ्च। इति राजवल्लभ:॥ विष्णु:। यथा,—
"भूशयो भूषणो भूतिर्विशोक: शोकनाशन:॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम्॥

भूशेलु:, पुं, ( भुवि ख्याता शेलु: शाकपार्थिवादिवत् समास:।) भूकर्व्वुदारक:। इति राजनिर्घण्ट:॥

भूष कि भूषणे। इति कविकल्पद्रुम:॥ ( चुरा०-पर०-सक०-सेट्।) कि भूषयति भूषति हारो जनम्। इति दुर्गादास:॥

भूषणं, क्ली, ( भूष्यते अनेनेति। भूष+करणे ल्युट्।) अलङ्कार:। इति हेमचन्द्र:।३।३१३॥ ( यथा, चाणक्यसंग्रहे। ८।
"नक्षत्रभूषणं चन्द्रो नारीणां भूषणं पति:॥")
देवदेयभूषणादि यथा,—
"भोग्यभूषोत्तमं नित्यं भूषणानि शृणुष्व मे।
किरीटञ्च शिरोरत्नं कुण्डलञ्च ललाटिका॥
तालपत्रञ्च हारञ्च ग्रैवेयकमथोर्म्मिका।
प्रालम्बिका रत्नसूत्रसुतुङ्गोऽथार्द्धमालिका॥
पार्श्वद्योतो नखद्योतो ह्यङ्गुलीच्छादकस्तथा।
कटिलग्नं माणवको मूर्द्धतारा ललन्तिका॥
अङ्गदो बाहुवलय: शिखाभूषणमिज्जिका।
प्राणबन्धं तद्भाग्यं नाभिपूरोऽथ मालिका॥
सप्तकी शृङ्खलञ्चैव दन्तपत्रञ्च वर्णक:।
ऊरुसूत्रञ्च नीवी च सुचिबद्धं प्रकीर्णकम्॥
पादाङ्गदं हंसकञ्च नूपुरं क्षुद्रघण्टिका।
मुखपट्टमिति प्रोक्ता अलङ्कारा: सुशोभना:॥
चत्वारिंशदमी प्रोक्ता लोके वेदे च सौख्यदा:।
अलङ्कारा: प्रदानेन चतुर्व्वर्गप्रदायका:॥
एतेषां पूजनं कृत्वा प्रदद्यादिष्टसिद्धये।
तेषां देवतनुस्थाप्य पूजयेत्तु विचक्षण:॥
शिरोगतानि चाद्यात् सौवर्णानि तु सर्व्वदा।
चूड़ारत्नादिकानीह भूषणानि तु भैरव!॥
ग्रैवेयकादि हंसान्तं सौवर्णं राजतञ्च वा।
निवेदयेत्तु देवेभ्यो नान्यत्तैजससम्भवम्॥
रीतिवङ्गादिसंजातं पात्रोपकरणादिकम्।
दद्यादायसवर्ज्जन्तु भूषणं न कदाचन॥
घण्टाचामरकुम्भादि पात्रोपकरणादिकम्।
तद्भूषणान्तरे दद्याद् यस्मात्तदुपभूषणम्॥
सर्व्वं ताम्रमयं दद्याद्यत्किञ्चिद्भूषणादिकम्।
सर्व्वत्र स्वर्णवत्ताम्रमर्घ्यपात्रे ततोऽधिकम्॥
पूजार्घ्यपात्रं नैवेद्याधारपात्रञ्च पानकम्।
औडुम्बरं सदा विष्णो: प्रीतिदं तोषदं तदा॥
ताम्रे देवा: प्रमोदन्ते ताम्रे देवा: सदा स्थिता:।
सर्व्वप्रीतिकरं ताम्रं तस्मात्ताम्रं प्रयोजयेत्॥
स्वोपयोगे नर: कुर्य्याद्देवानामपि भैरव!।
ग्रीवोर्द्धदेशे रौप्यन्तु न कदाचिच्च भूषणम्॥
प्रावार: पानपात्रञ्च गेन्दुकं गृहमेव च।
पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम्॥
अयोमयन्त्वते कांस्यन्तते यद्भूषणं भवेत्।
स्वर्णरौप्यस्य चाभावे त्वध:काये नियोजयेत्॥
एतेषां भूषणादीनां यद्दातुं शक्यते नरै:।
तत्तद्दद्यात् सम्भवे तु सर्व्वमेव प्रदापयेत्॥
चतुर्व्वर्गप्रदं नित्यं भूषणं सर्व्वसौख्यदम्।
तुष्टिपुष्टिप्रीतिकरं यथाशक्त्योदये स्मरेत्॥
इदं ते भूषणं प्रोक्तं सर्व्वदेवस्य तुष्टिदम्।"
इति कालिकापुराणे ६८ अध्याय:॥
अथालङ्कारयुक्ति:। तद्धारणदिनमुच्यते।
"रेवत्यश्विधनिष्ठासु हस्तादिष्वपि पञ्चसु।
गुरुशुक्रबुधस्याह्नि वस्त्रालङ्कारधारणम्॥
अनिष्टेष्वपि निर्द्दिष्टं वस्त्रालङ्कारधारणम्।
उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मते॥
शिरस्यं मुकुटं हार: कुण्डलञ्चाङ्गदन्तथा।
कङ्कणं बालकञ्चैव मेखलाष्टाविति क्रमात्॥
प्रधानभूषणान्येषु यथा स्वं याति निश्चय:।
पद्मरागश्च वज्रश्च विजयी गोविदस्तथा॥
मुक्तावैदूर्य्यनीलञ्च यथा मरकतं क्रमात्।
आदित्यादिग्रहाणां सर्व्वसम्पत्तिदायका:॥
सुवर्णेनापि घटना सर्व्वेषामुपयुज्यते।
प्रधानभूषणेष्वेवमप्रधाने न निर्णय:॥
प्रधानभूषणं प्राय: शिरसो ह्यभिधीयते।
तस्य प्रधानभूतत्वादित्याह भृगुनन्दन:।'
सुखदा मणय: शुद्धा दु:खदा दोषशालिन:॥"
इति युक्तिकल्पतरु:॥
तद्धारणफलम् यथा,—
"भूषणं भूषयेदङ्गं यथायोग्यविधानत:।
शुचिसौभाग्यसन्तोषदायकं काञ्चनं स्मृतम्॥
ग्रहदृष्टिहरं पुष्टिकरं दु:खप्रणाशनम्।
पापदौर्भाग्यशमनं रत्नाभरणधारणम्॥
माणिक्यं तरणे: सुजात्यममलं मुक्ताफलम्
शीतगो-
र्माहेयस्य च विद्रुमो निगदित: सौम्यस्य
गारुत्मतम्।
देवेज्यस्य च पुष्परागमसुराचार्य्यस्य वज्रं शने-
र्नीलं निर्म्मलमन्ययोश्च गदिते गोमेदवैदूर्य्यके॥
वास: सगन्धरत्नानां धारणं प्रीतिवर्द्धनम्।
रक्षोघ्नमर्थ्यमोजस्यं सौभाग्यकरमुत्तमम्॥"
इति भावप्रकाश:॥

भूषण:, पुं, (भूषयति भक्तवृन्दमिति भूष्यतेऽनेनेति वा। भूष+ल्यु: वा ल्युट्।) विष्णु:। यथा,—
"भूशयो भूषणो भूतिर्विशोक: शोकनाशन:।"
इति तस्य सहस्रनामस्तोत्रम्॥
( राजविशेष:। यथा, कथासरित्सागरे। ४७। १३।
"वसुदत्तादयश्चैते राजानोऽपरथा इमे।
अङ्कुरी सुविशालश्च दृष्टिभूषणशोभिला:॥")

भूषा, स्त्री, ( भूष+भावे अ: टाप् च।) अलङ्क्रिया। इत्यमर:। २। ६। १०१॥ ( यथा, भागवते। ३। २२। २२।
"दम्पत्यो: पर्षदात् प्रीत्या भूषावास:परि-
च्छदान्॥" )

भूषित:, त्रि, ( भूष+क्त:।) अलङ्कृत:। इत्यमर:। २। ६। १००॥ ( यथा, भट्टि:।६।७३।
"भृङ्गालीकोकिलक्रुङ्भिर्वाशनै: पश्य लक्ष्मण!।
रौचनैर्भूषिता पम्पामस्माकं हृदयाविधम्॥")